"कृष्णपित्तहृतश्यामा पालिन्दीतङ्कलीयकैः ॥") पालिन्दी । त्रिवृता । इति द्विरूपकोषः ॥ (अस्याः पर्य्यायो यथा,—
"त्रिवृत् श्यामार्द्धचन्द्रा च पालिन्दी च सुषेणिका ।
मसूरविदलाकोलकेशिका कालमेषिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पालिन्दी, स्त्री, कृष्णत्रिवृता । इत्यमरः ।२।४।१०८॥

पाली, स्त्री, (पालि + कृदिकारादिति वा ङीष् ।) यूका । प्रशस्तयोषित् । इति मेदिनी । ले, ३० । श्रेणी । इति शब्दरत्नावली ॥ स्थाली । इति शब्दचन्द्रिका ॥

पावकः, पुं, (पुनातीति । पू ञ णि शोधे + ण्वुल् ।) अग्निः । इत्यमरः ।१।१।५७॥ (यथा, काशीखण्डे ९ अध्याये ।
"अपावनानि सर्व्वाणि वह्निसंसर्गतः क्वचित् ।
पावनानि भवन्त्येव तस्मात् स पावकः स्मृतः ॥")
वैद्युताग्निः । यथा,—
"पावकः पवमानश्च शुचिरग्निश्च ते त्रयः ।
निर्म्मथ्यः पवमानः स्याद्वैद्युतः पावकः स्मृतः ॥
यश्चासौ तपते सूर्य्यः शुचिरग्निस्त्वसौ स्मृतः ॥"
इति कौर्म्मे १२ अध्यायः ॥
स च ब्रह्मणो मानसपुत्त्रादभिमानिनामकाग्नेः स्वाहायां जातः । यथा,—
"योऽसावग्निरभीमानी स्मृतः स्वायम्भुवेऽन्तरे ।
ब्रह्मणो मानसः पुत्त्रस्तस्मात् स्वाहा व्यजीजनत् ॥
पावकं पवमानञ्च शुचिरग्निश्च यः स्मृतः ॥"
इति मात्स्ये ४८ अध्यायः ॥
सदाचारः । वह्निमन्थः । (अस्य पर्य्यायो यथा,
"तेजोमन्थो हविर्मन्थो ज्योतिष्को पावकोऽरणिः ।
वह्निमन्थोऽग्निमन्थश्च मथनो गणिकारिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
चित्रकः । भल्लातकः । विड़ङ्गः । इति मेदिनी । के, ११८॥ शोधयितृनरः । इति हेमचन्द्रः ॥ रक्तचित्रकः । कुसुम्भः । इति राजनिर्घण्टः ॥ (पवित्रकारके, त्रि । यथा, ऋग्वेदे । ३ । ३१ । २० ।
"मिहः पावकाः प्रतता अभूवन् ॥")

पावकारणिः, पुं, (पावकाय वह्न्युत्पादनार्थं अरणिरिव ।) अग्निमन्थः । इति शब्दमाला ॥

पावकिः, (पावकस्यापत्यम् । पावक + इञ् ।) कार्त्तिकेयः । यथा,—
"कथं सं कृत्तिकापुत्त्रमुक्तवान् तं सुरं गुहम् ।
कथञ्च पावकिरसौ कथं वा मातृनन्दनः ॥"
इति वराहपुराणम् ॥

पावनं, क्ली, (पावयत्यनेनेति । पू + णिच् + ल्युट् ।) जलम् । कृच्छ्रम् । इति मेदिनी । ने, ९०॥ गोमयम् ॥ इति शब्दचन्द्रिका ॥ रुद्राक्षम् । कुष्ठम् । इति राजनिर्घण्टः ॥ चित्रकम् । अध्यासः । प्रायश्चित्तम् । इति विश्वः ॥ (शुद्धिः । यथा, मनुः । ११ । १७८ ।
"या चेत् पुनः प्रदुष्येत्तु सदृशेनोपयन्त्रिता ।
कृच्छ्रं चान्द्रायणञ्चैव तदस्याः पावनं स्मृतम् ॥")

पावनः, पुं, (पावयतीति । पू + णिच् + ल्युः ।) व्यासः । पावकः । इति मेदिनी । ने, ९० ॥ (यथा, ३।१८५। मनुश्लोकटीकायां कुल्लूकभट्टः । "पावनः सभ्योऽग्निर्यः शीतापनोदनाद्यर्थं बहुषु देशेष्वपि विधीयते ॥") सिह्लकः । इति विश्वः ॥ पीतभृङ्गराजः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ४५ ।
"भूतभव्यभवन्नाथः पवनः पावनोऽनलः ॥"
"पावयतीति पावनः । भीषास्माद्वातः पवते इति श्रुतेः ।" इति शाङ्करभाष्यम् ॥) सिद्धः । पवित्रे पावयितरि च, त्रि । इति हेमचन्द्रः ॥ (यथा, रघुः । १९ । ५३ ।
"स त्वनेकवनितासखोऽपि सन्
पावनीमनवलोक्य सन्ततिम् ।
वैद्ययत्नपरिभाविनं गदं
न प्रदीप इव वायुमत्यगात् ॥")

पावनध्वनिः, पुं, (पावनः पवित्रजनको ध्वनिर्यस्य ।) शङ्खः । इति राजनिर्घण्टः ॥ (पावनो ध्वनिरिति विग्रहे ।) पवित्रशब्दः ॥

पावनी, स्त्री, (पावयत्यनयेति । पू + णिच् + ल्युट् + ङीप् ।) हरीतकी । इति विश्वः ॥ तुलसी । गौः । इति राजनिर्घण्टः । गङ्गा । यथा, शङ्कराचार्य्यकृतगङ्गाष्टके ।
"ब्रह्माण्डं खण्डयन्ती हरशिरसि जटावल्लिमुल्लासयन्ती
स्वर्लोकादापतन्ती कनकगिरिगुहागण्डशैलात् स्खलन्ती ।
क्षोणीपृष्ठे लुठन्ती दुरितचयचमूनिर्भरं भर्त्सयन्ती
पाथोधिं पूरयन्ती सुरनगरसरित्पावनी नः पुनातु ॥"
(इयन्तु गङ्गाया अंशविशेषः । यथा, मात्स्ये । १२० । ३९—४१ ।
"ततो विसर्ज्जयामास संरुद्धां स्वेन तेजसा ।
नदीं भगीरथस्यार्थे तपसोग्रेण तोषितः ।
ततो विसर्ज्जयामास सप्त स्रोतांसि गङ्गायाः ॥
त्रीणि प्राचीमभिमुखं प्रतीचीं त्रीण्यथैव तु ।
स्रोतांसि त्रिपथगायास्तु प्रत्यपद्यन्त सप्तधा ॥
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा ।
सीता चक्षुश्च सिन्धुश्च तिस्रस्ता वै प्रतीच्यगाः ॥
सप्तमी त्वनुगा तासां दक्षिणेन भगीरथम् ।
तस्माद्भागीरथी सा वै प्रविष्टा दक्षिणोदधिम् ॥"
शाकद्वीपस्थ नदीविशेषः । यथा, मत्स्यपुराणे । १२१ । ३१ ।
"नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥")

पाशः, पुं, (पश्यते बध्यतेऽनेनेति । पश + घञ् ।) शस्त्रभेदः । इति शब्दरत्नावली ॥ (वैशम्पायनधनुर्व्वेदोक्तपाशलक्षणं यथा,—
"पाशः सूक्ष्मावयवो लौहधातुस्त्रिकोणवान् ।
प्रादेशपरिधिः सीसगुलिकाभरणान्वितः ॥"
आग्नेयधनुर्व्वेदोक्तलक्षणं यथा,—
"दशहस्तो भवेत् पाशो वृत्तः करमुखस्तथा ।
गुणकार्पाससुञ्जानामर्कस्नायवचर्म्मणाम् ॥
अन्येषां सुदृढ़ानाञ्च सुकृतं परिवेष्टितम् ।
तथा त्रिंशत्समं पाशं बुधः कुर्य्यात् सुवर्त्तितम् ॥"
अस्य क्रियादिकं यथा,—
"कर्त्तव्यं शिक्षकैस्तस्य स्थानं कक्षासु वै सदा ।
वामहस्तेन संगृह्य दक्षिणेनोद्धरेत्ततः ॥
कुण्डलस्याकृतिं कृत्वा भ्राम्यैकं मस्तकोपरि ।
क्षिपेत्—————————— ॥"
"वल्गिते च द्रुते चैव तथा प्रव्रजितेषु च ।
समयोगविधिं ज्ञात्वा प्रयुञ्जीत सुशिक्षितः ॥
विजित्वा तु यथान्यायं ततो बन्धं समाचरेत् ।
कट्यां बद्ध्वा ततः खड्गं वामपार्श्वावलम्बितम् ॥
दृढ़ं विगृह्य वामेन निष्कर्षेद्दक्षिणेन च ॥"
अन्यच्च ।
"परावृत्तमपावृत्तं गृहीतं लघुसंज्ञितम् ।
ऊर्द्ध्वक्षिप्तमधःक्षिप्तं सन्धारितविधारितम् ॥
श्येनपातं गजपातं ग्राहग्राह्यं तथैव च ।
एवमेकादशविधा ज्ञेयाः पाशविधारणाः ॥"
वैशम्पायनोक्तक्रिया यथा,—
"प्रसारणं वेष्टनञ्च कर्त्तनञ्चेति ते त्रयः ।
योगाः पाशाश्रिता लोके पाशाः क्षुद्रसमाश्रिताः ॥"
अन्यच्च ।
"ऋज्वायतं विशालञ्च तिर्य्यक्भ्रामितमेव च ।
पञ्च कर्म्मविनिर्द्दिष्टं व्यस्ते पाशे महात्मभिः ॥")
कचान्ते समूहार्थः । (यथा, माघे । ७ । ६२ ।
"श्लथशिरसिजपाशपातभारा-
दिव नितरां नतिमङ्गिरंसभागैः ॥")
कर्णान्ते शोभनार्थः । छात्राद्यन्ते निन्दार्थः । पक्षादिबन्धनरज्ज्वादि । इति विश्वः ॥ (यथा, महाभारते । ५ । ६४ । १ ।
"शकुनीनामिहार्थाय पाशं भूमावयोजयत् ।
कश्चिच्छाकुनिकस्तात पूर्व्वेषामिति शुश्रुम ॥"
योगविशेषः । यथा, ज्योतिषे ।
"यदा राशिपञ्चके सर्व्वग्रहा भवन्ति तदा पाशाख्ययोगो भवति ॥" पारिभाषिकपाशो यथा, कुलार्णवे १ उल्लासे ।
"घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी ।
कुलं शीलं तथा जातिरष्टौ पाशाः प्रकीर्त्तिताः ॥"
स्वप्नेऽस्य दर्शनफलं यथा,—
"कार्पासभस्मास्थिकपालशूलं
चक्रञ्च पाशन्त्वथवा प्रपश्येत् ।
तस्यापदं रोगधनक्षयं वा
रोगी क्षतिं वा लभतेऽतिकष्टम् ॥"
इति हारीते द्वितीये स्थाने द्वितीयेऽध्याये ॥)

पाशकः, पुं, (पाशयति पीड़यतीति । पश + णिच् + ण्वुल् ।) द्यूतविशेषः । पाशा इति भाषा । तत्पर्य्यायः । अक्षः २ देवनः ३ । इत्यमरः । २ । १० । ४५ ॥ सारिः ४ शारिः ५ सारः शारः ७ पाशः ८ । इति शब्दरत्नावली ॥